श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गराज सुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीरङ्गराज सुप्रभातम् ॥

श्रीरङ्गभूमितलभूसुरदेशिकेन्द्रैः
श्रीरङ्गवाटमिदमित्युदितैः प्रबोधैः।
श्रीभूमिपाणिकमलैश्च समाश्रिताङ्घ्रे
श्रीरङ्गराज जगदीश्वर सुप्रभातम्॥ १ ॥

कस्तूरिकाकलिकया कलितालकस्य
कन्दर्पकोटिसदृशस्य कृपाम्बुराशेः।
कल्याणभूमिधर काङ्क्षितधैर्यसिन्धो
श्रीरङ्गराज जगदीश्वर सुप्रभातम्॥ २ ॥

लीलाविशेषललितालल्लितेन्दिरायाः
मालाकवेरतनया मणिरेव साक्षात्।
श्रीरङ्गराडिति जना निगदन्ति सर्वे
श्रीरङ्गराज जगदीश्वर सुप्रभातम्॥ ३ ॥

जम्बुद्रुमादिवसतेः शशिराजमौलेः
संभूतनिर्झरनदीहतकल्मषस्य।
उद्दीपनं वितनुते तव पादसेवा
श्रीरङ्गराज विजयिन् तव सुप्रभातम्॥ ४ ॥

श्रीरङ्गराजभवने भुवनैकमान्ये
सीताकराम्बुरुहसेव्यतयातिधन्ये।
याने विमानशयने वरवेदशृङ्गे
श्रीरङ्गराज जगदीश्वर सुप्रभातम्॥ ५ ॥

श्रीचन्द्रपुष्करिणिकासरसःप्रतीरे
श्रीवृक्षमूल कमलाक्ष कटाक्षपूरे।

श्रीसह्यजावरविभूषण दिव्यमूर्ते
श्रीरङ्गराज जगदीश्वर सुप्रभातम्॥ ६ ॥

सूर्येन्दुमण्डलमृगेन्द्रसुपर्णशेष-
वालाभिवर्यगजवाजिरथप्रधानैः।
दिव्यैर्विमानशयने दययात्तनाथ
श्रीरङ्गराज जगदीश्वर सुप्रभातम्॥ ७ ॥

लक्ष्मीश केशव हरे नृहरे मुरारे
शौरे रमारमण कारण दीनबन्धो।
इत्यादरेण वदतामिह वाञ्छितार्थ
श्रीरङ्गराज जगदीश्वर सुप्रभातम्॥ ८ ॥

श्रीसुप्रभातविनुतं सुकृताभिधेयं
प्रातस्समाहितमतिर्य इदं पठेत्तु।
तस्मै भुजङ्गशयनो भुवि रङ्गनाथः
सर्वाणि वाञ्छितफलानि सदा प्रसूते॥ ९ ॥

॥ इति श्रीरङ्गराज सुप्रभातं समाप्तम्॥

www.prapatti.com